International Journal of Sanskrit Research 2020; 6(5): 76-80

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(5): 76-80
© 2019 IJSR
www.anantaajournal.com
Received: 10-07-2020
Accepted: 14-08-2020

**महेन्द्रः सोमयाजी**
शोधच्छात्रः, राष्ट्रियसंस्कृत विद्यापीठम् तिरुपतिः
मार्गदर्शक – नरसिंहाचार्य पुरोहितः । आन्ध्रप्रदेशः, भारतम्

Correspondence
**महेन्द्रः सोमयाजी**
शोधच्छात्रः, राष्ट्रियसंस्कृत विद्यापीठम् तिरुपतिः
मार्गदर्शक – नरसिंहाचार्य पुरोहितः । आन्ध्रप्रदेशः, भारतम्

# माण्डूकोपनिषद्विचाराणां हरिवंशे संवाददर्शनम्

**महेन्द्रः सोमयाजी**

## प्रस्तावना

माण्डूकोपनिषत् अथर्ववेदसम्बन्धिनी । मण्डूकरूपिणा वरुणेन दृष्टत्वात् इयम् उपनिषत् माण्डूकोपनिषत् । वरुणदृष्टमन्त्राणां संवादरूपेण ब्रह्मदृष्टमन्त्राः अपि उक्ताः । वरुणदृष्टमन्त्राः गद्यरूपेण विद्यन्ते । ब्रह्मदृष्टमन्त्राः पद्यरूपेण विद्यन्ते । एवं गद्यपद्यमयी एषा । अस्यामुपनिषदि परब्रह्मणः ओङ्कारवाच्यत्वं विस्तरेण प्रतिपादितम् । विश्वादिरूपचतुष्टयेन अवस्थाचतुष्टयं नियमयति भगवान् इत्यपि अस्य हृदयम् । हरिवंशः महाभारतस्य खिलभागः। अत एव एषः इतिहासविभागे अन्तर्भवति । अस्मिन् हरिवंशपर्व, विष्णुपर्व, भविष्यपर्व चेति विभागाः विद्यन्ते । माण्डूकोपनिषदुक्तविचाराणां बहूनां संवादाः विद्यन्ते हरिवंशे । 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्' इति उक्तरीत्या माण्डुकोपनिषदः व्याख्यानं हरिवंशश्लोकैः क्रियते चेत् युक्तमेव भवति ।

## माण्डूकोपनिषदि प्रस्तुताः प्रमेयाः

माण्डूकोपनिषत् अपौरुषेयः । 'वेदैश्च सर्वैरहमेव वेद्यः' इति भगवदुक्तरीत्या अशेषवेदैः मुख्यतया भगवत्तत्त्वनिरूपणं क्रियते । तत्पोषकत्वेन इतरविचारप्रस्तुतिरिति भावः । माण्डूकोपनिषदि मुख्यतः एते विचाराः उच्यन्ते –

१) भगवतः सर्वेश्वरत्वम् ।
२) भगवतः नित्यत्वम् ।
३) चित्प्रकृत्याः ( लक्ष्म्याः ) नित्यत्वम् ।
४) भगवतः विश्वादिरूपचतुष्टयनिरूपणम् ।
५) भगवान् चतुर्मुखस्य स्वामी ।
६) भगवान् अचिन्त्यः ।
७) भगवान् सृष्ट्यादिकर्ता ।
८) विष्णुरेव परं ब्रह्म ।

एते मुख्यतया माण्डूकोपनिषदि उच्यन्ते । एते अंशाः हरिवंशेऽपि विद्यन्ते । माण्डूकोपनिषद्भाष्ये श्रीमन्मध्वाचार्यैः ये विचाराः उक्ताः तेषां संवादाः हरिवंशे विद्यन्ते इति सिद्ध्यति ।

**भगवतः सर्वेश्वरत्वविचारे संवाददर्शनम्**

माण्डूकोपनिषदि 'एष सर्वेश्वरः' इति उक्तम् । एष चतूरूप आत्मा नारायणः सर्वेश्वरः इति भाष्याभिप्रायः । अतः विष्णुः सर्वेश्वरः इति माण्डूकोपनिषन्मध्वभाष्याभिप्रायः । अस्य संवादाः हरिवंशे विद्यन्ते । हरिवंशे एवमुच्यते –

[1]पुरुषोत्तमाय युक्ताय निर्गुणाय नमोऽस्तु ते ।
वरदो भव मे नित्यं त्वद्भक्ताय सुरोत्तम ।
लोकनाथोऽसि नाथ त्वं विष्णुस्त्वं विदितात्मनाम् ॥

भीष्मकस्य वचनमेतत् । अत्र भगवतः पुरुषोत्तमत्वं लोकनाथत्वं च उक्तम् । अतः भगवान् सर्वेश्वर इति सिद्ध्यति । एवं च हरिवंशे एवमपि उक्तम् –

[2]भवन्तं शरणं प्राप्य देवानामपि दैवतम् ।
सम्यग्भवतु मे दृष्टिः सम्पश्यन्तु च मे क्रियाः ॥

इदमपि वचनं भीष्मकस्य । अत्र भगवान् देवानामपि देव इति उक्तम् । देवाः सामान्यजीवानाम् ईश्वराः इति प्रसिद्धाः । भगवान् देवानामपि देवः अतः सः सर्वेश्वरः। हरिवंशे अन्यः श्लोक एवं विद्यते –

[3]भगवान् सर्वभूतेश वेत्तुमिच्छामि ते प्रभो ।
पृच्छामि त्वां प्रपन्नोऽहं नमस्ते पुरुषोत्तम ।

अर्जुनस्य वचनमेतत् । अस्मिन् श्लोके भगवान् भूतेशः पुरुषोत्तमश्च इति उक्तम् । भूताः नाम जडानि । अतः सर्वाण्यपि पाञ्चभौतिकवस्तूनि भगवतो वशे वर्तन्ते इति सिद्ध्यति । अतः परं पुरुषोत्तमो भगवान् इत्यपि उक्तम् । पुरुषाः नाम चेतनाः । एवं भगवान् चेतनश्रेष्ठः इत्यपि उक्तं भवति । यो हि श्रेष्ठः स एव ईश्वरो भवति लोकसिद्धम् । अतो भगवान् जीवेश्वरः इति सिद्ध्यति । लोके सर्वेऽपि जीवजडयोः अन्तर्भवन्ति । अन्यन्नास्ति । अतः भगवान् सर्वेश्वरः ।

**भगवतः नित्यत्वविचारे संवाददर्शनम् ।**

माण्डूकोपनिषदि 'तस्य उपव्याख्यानं भूतं भवद्भविष्यदिति' इति उक्तम् । अस्य भाष्ये 'सर्वदा नित्य इत्येषा व्याख्योङ्कारस्य कीर्तिता' इति उक्तम् । भगवान् त्रिष्वपि कालेषु विकाररहितः अत एव नित्यः इति भावः । हरिवंशे एवमुच्यते –

[4]देवदेव नमस्तुभ्यम् अनादिनिधनाय च ।

भीष्मकस्य वचनमेतत् । अत्र भगवान् अनादिनिधन इति उक्तम् । न विद्यते आदिनिधने यस्य सः अनादिनिधनः । एवं भगवान् नित्य इति सिद्ध्यति । एवं च अन्यत्र हरिवंशे एवमुक्तम् –

[5]विसृज्य तान् वै भगवान् अनादिनिधनोऽच्युतः ।
सम्पूज्य च यथान्यायं स्वमेव भवनं गतः ।

अत्रापि भगवान् अनादिनिधन इति उक्तत्वात् सः नित्य इति सिद्ध्यति ।

**चित्प्रकृत्याः ( लक्ष्म्याः ) नित्यत्वविचारे संवाददर्शनम्।``**

उपनिषदि 'यच्चान्यत् त्रिकालातीतं तदप्योङ्कार एव' इति उक्तम् । अस्य भाष्ये 'प्रकृतेरपि त्रिकालातीत्वं विद्यत इति अन्यदिति विशेषणम्' इति उक्तम् । एवं प्रकृतिः ( लक्ष्मीः ) त्रिकालातीता इति सिद्ध्यति । हरिवंशे एवमुच्यते –

[6]रुक्मिणी नाम ते कन्या न सा प्राकृतमानुषी ।
श्रीरेषा ब्रह्मवाक्येन जाता केनापि हेतुना ॥

भगवतः कृष्णस्यैव वचनमेतत् । रुक्मिणी लक्ष्म्याः अवतारः । रुक्मिणी न प्राकृतमानुषी इति उक्तम् । अतः सा अप्राकृता इति सिद्ध्यति । अप्राकृतत्वं यत्र विद्यते तत्र नित्यत्वं विद्यते । यथा भगवान् । अतः चित्प्रकृतिः लक्ष्मीः नित्या इति सिद्ध्यति ।

**भगवतः विश्वादिरूपचतुष्टयविचारे संवाददर्शनम्**

उपनिषदि 'सोऽयमात्मा चतुष्पात्' इति उक्त्वा विश्वः तैजसः प्राज्ञः तुरीयश्च चत्वारि रूपाणि इति उक्तम् । विश्वः जागृन्नियामकः, तैजसः स्वप्ननियामकः, प्राज्ञः सुषुप्तिनियामकः, तुरीयो मोक्षनियामकः इति चोक्तम् ।

रूपचतुष्टयविचारे कतिपयसंवादाः हरिवंशे लभ्यन्ते । हरिवंशे एवमुच्यते –

[7]मणिकनकविचित्रपाणिपादो
निरतिशयार्कगुणोऽरिहादिनाथः ।
चतुरुदधिशयश्चतुर्विधात्मा जयति जगत्पुरुषः सहस्रनामा ॥

अस्मिन् श्लोके चतुर्विधात्मा इति उक्तम् । उपनिषदि 'सोऽयमात्मा चतुष्पात्' इति उक्तम् । एवं भगवतः रूपचतुष्टयविचारे परस्परसंवादो विद्यते । हरिवंशे एवमपि उच्यते –

[8]शाश्वतायादिदेवाय नारायण परायण ।
स्वयम्भुवे च विश्वाय स्थाणवे वेधसाय च ॥

भीष्मकस्य वचनमिदम् । अत्र भगवान् आदिदेवः इति उक्तम् । एवञ्च सः विश्वः इत्युक्तम् । अत्र केवलं विश्वशब्देन भगवद्व्यपदेशः क्रियते चेत् निरवकाशत्वं न स्यात् । किन्तु आदिदेवत्वं निरवकाशत्वं सूचयति । उपनिषदि विश्वः अकारवाच्यः इति उपासनस्य फलम् एवमुक्तम् । 'आप्नोति ह वै सर्वान् कामान् आदिश्च भवति य एवं वेद' इति उक्तम् । अकारेण यः विश्वस्य उपासनं करोति तस्य विश्वरूपी भगवान् आदिः मोक्षदाता भवति इत्यभिप्रायः । भाष्ये 'आदिश्चास्य उपासकस्य भवति' इति उक्तम् । एवञ्च भाष्योक्तप्रमाणे 'तस्मादुत्पद्यतेमुक्तः सज्ज्ञानानन्दलक्षणः' इति उक्तम् । उपनिषदि विश्वस्य आदिपदवाच्यत्वं उक्तम् । हरिवंशेऽपि विश्वः आदिदेव इति उक्तम् । एवञ्च अस्मिन् श्लोके परायण इति च उक्तम् । एवं भाष्यगतप्रमाणोक्तमोक्षदातृत्वं च अनेन उक्तत्वात् संवादसिद्धिः । अयमाशयः । उपनिषदि भगवतः विश्वपदवाच्यत्वम् उक्तम् । हरिवंशेऽपि उक्तम्। उपनिषदि विश्वस्य आदिपदवाच्यत्वम् उक्तम् । हरिवंशेऽपि उक्तम् । उपनिषदि विश्वोपासकस्य मोक्षसिद्धिः उक्ता । हरिवंशेऽपि उक्ता । एवं उपनिषदि यत् विद्यते विश्वनिरूपणं तस्य संवादो विद्यते हरिवंशे । हरिवंशे एवमपि उक्तम् –

[9]षोडशस्त्रीसहस्राणि जले जलजलोचनः ।
रमयामास गोविन्दो विश्वरूपेण सर्वदृक् ॥

अत्र भगवतः विश्वरूपत्वं सर्वदृक्त्वं चोक्तम् । उपनिषदि 'बहिःप्रज्ञो विभुर्विश्वः' इति उक्तम् । बहिःप्रज्ञापयतीति हेतोः सः बहिःप्रज्ञः इति भाष्याभिप्रायः । चक्षुरादीन्द्रियद्वारा विषयज्ञानं ददाति । एवं च उपनिषदि 'विश्वो हि स्थूलभुक्' इति उक्तम् । जीवस्य अक्षिणि स्थित्वा विषयज्ञानं विषयभोगं च जीवाय ददाति । तस्य सारभागः विश्वस्यैव भवति । सारो नाम भगवद्रूपम् । विषयगतभगवद्रूपं जीवाक्षिस्थं विश्वं प्रविशति । अस्मिन् श्लोके सर्वदृक्त्वं विश्वस्य उक्तम् । नैकजीवेषु परमात्मा विश्वरूपेण विद्यते । तेषु जीवेषु स्थित्वा सः सर्वदृक् भवति इत्याशयः । एवं उपनिषदि यदुक्तं भगवतो विश्वशब्दवाचकत्वं सर्वदृक्त्वं च तयोः संवादो दृश्यते हरिवंशे । एवं विश्वादिषु चतुर्षु रूपेषु विश्वविचारे संवादो दृश्यते हरिवंशे । सूक्ष्मदृष्ट्या अवलोकनं क्रियते चेत् तैजसादीनामपि संवादो दृश्येत । उपनिषदि 'कालात् प्रसूतिं भूतानां मन्यन्ते कालचिन्तकाः' इति उक्तम् । केचन अविवेकिनः काल एव जगत्कारणमिति वदन्तीति पूर्वपक्षः कृतः । अत्र कालशब्देन प्रकृतिचतुर्मुखरुद्रादिगणनं कर्तव्यमिति भाष्याभिप्रायः । एतेषां जगत्कारणत्वं न उपनिषत्सम्मतमित्यभिप्रायः । अत्र भाष्ये 'प्रधानकालब्रह्मेशमुखाः सर्वेऽपि तद्वशाः' इति उक्तम् । प्रकृतिः, कालः, चतुर्मुखः, रुद्रादयश्च सर्वेऽपि भगवतो वशे वर्तन्ते इति भावः । अत्र चतुर्मुखस्य भगवदधीनत्वविचारे संवादो विद्यते हरिवंशे ।

[10]तस्याव्यक्तस्य यो व्यक्तो भागः सर्वभवोद्भवः ।
तस्यात्मा परमो देवो विष्णुः सर्वस्य धीमतः ॥

अव्यक्तं नाम मूलप्रकृतिः । व्यक्तो भागो नाम महत्तत्त्वम् । सर्वभवाः जडानि जीवाश्च । तेषां उद्भवः यस्मात् भवति सः सर्वभवोद्भवः चतुर्मुखः । सः महत्तत्त्वस्य अभिमानी । तस्य आत्मा नाम स्वामी विष्णुः । सः परमो देवः । सर्वोत्तम इत्यर्थः । यदुक्तं

माण्डूकोनिषद्भाष्ये चतुर्मुखः भगवदधीन इति तस्य संवादो दृश्यते हरिवंशे ।

**भगवतः अचिन्त्यत्वविचारे संवाददर्शनम्**

माण्डूकोपनिषदि तुरीयस्वरूपकथनावसरे 'अचिन्त्यम्' इति उक्तम् । कात्स्न्र्येन तस्य चिन्तनं न शक्यते इति भावः । हरिवंशे एवमुच्यते –

[11]एवं पुराणपुरुषो विष्णुर्देवेषु पठ्यते ।
अचिन्त्यश्चाप्रमेयश्च गुणेभ्यश्च परस्तथा ॥

अत्रापि भगवतः अचिन्त्यत्वमुक्तम् । एवं उपनिषदुक्तविचारस्य संवादो दृश्यते हरिवंशे ।

**भगवतः सृष्ट्यादिकर्तृत्वविचारे संवाददर्शनम्**

उपनिषदि 'एष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम्' इति उक्तम् । भगवान् जगतः उत्पत्तिकारणं नाशकारणं चेत्यर्थः । हरिवंशे एवमुच्यते –

[12]प्रादुर्भावं गतो देवो जगतो हितकाम्यया ।
माथुरं जगतो नाथः कर्ता हर्ता च केशवः ॥

अस्मिन् श्लोकेऽपि भगवान् केशवो जगतः कर्ता हर्ता च इत्युक्तम् । कर्ता नाम सृष्टिकर्ता । हर्ता नाम प्रलये विनाशकः । एवञ्च हरिवंशे एवमपि उक्तम् –

[13] अतः समस्तदेवानां पूज्य एव च केशवः ।
पद्मनाभश्च भगवान् प्रजासर्गकरो विभुः ॥

अत्रापि पद्मनाभः प्रजानां अर्थात् जीवानां सृष्टिकर्ता तेषां देहदाता इत्युक्तम् । अतः 'एष योनिः सर्वस्य' इति माण्डूकोपनिषदुक्तस्य संवादो विद्यते हरिवंशे ।

**भगवतः सर्वज्ञत्वविचारे संवाददर्शनम्**

माण्डूकोपनिषदि 'एषः सर्वज्ञः' इति उक्तम् । भगवान् सर्वज्ञः इत्यभिप्रायः । हरिवंशे एवमुच्यते –

[14]वृथा त्वं स्पर्धसे नित्यं कृष्णेनामितबुद्धिना ।
यदि स्यादिह गोविन्दो नैतदत्याहितं भवेत् ॥

अत्र कृष्णः अमितबुद्धिरिति उक्तम् । तस्य ज्ञानस्य परिमितिरेव नास्ति इत्याशयः । सर्वज्ञ इत्यर्थः । हरिवंशे एवमपि उच्यते –

[15]मन्त्राश्च विविधाः पार्थ यानि शास्त्राणि कानिचित् ।
विद्याश्च वेदितव्यं च मत्तः प्रादुर्भवन्ति हि ॥

भगवतः वचनमिदम् । अत्र मन्त्राणां, शास्त्राणां, विद्यानां च प्रादुर्भावः भगवतः सकाशादेव भवतीति उक्तम् । एवं समस्तविद्योपदेशकत्वं विद्यते इति हेतोः भगवान् सर्वज्ञ इति सिद्ध्यति ।

**विष्णोः परब्रह्मत्वविचारे संवाददर्शनम्**

उपनिषदि 'ओमित्येतदक्षरमिदं सर्वम्......' इत्यादि उक्तम् । भाष्ये 'ओमित्युक्तं तु यद्ब्रह्म तदक्षरमुदाहृतम् । ओतमत्र जगद्यस्मादों तस्माद्भगवान् हरिः' इति उक्तम् । सर्वाश्रयस्य हरेः एव अक्षरम् ओमिति च संज्ञा वर्तते । स एव परं ब्रह्म इत्यभिप्रायः । हरिवंशे एवमुक्तम् –

[16]सा साङ्ख्यानां गतिः पार्थ योगिनां च तपस्विनाम् ।
तत्पदं परमं ब्रह्म सर्वं विभजते जगत् ॥
मामेव तद्घनं तेजो ज्ञातुमर्हसि भारत ।
समुद्रः स्तब्धतोयोऽहमहं स्तम्भयिता जलम् ॥

इदं भगवद्वचनम् । अत्र स्पष्टतया भगवान् वदति । सर्वेषामपि गतिः यत् विद्यते परं ब्रह्म तत् अहमेव इति भगवता उक्तम् । एवं माण्डूकोपनिषदुक्तस्य संवादो दृश्यते हरिवंशे ।

एवं माण्डूकोपनिषदुक्तानां विचाराणां संवादाः दृश्यन्ते हरिवंशे । यद्यपि उपनिषत् स्वतः प्रमाणम् । अथापि इतरसंवादबलात् तदुक्तप्रमेयेषु दार्ढ्यं भवति ।

**संधर्व सूचि**

1. हरिवंशः – विष्णुपर्वणि एकपञ्चाशत्तमाध्यायः ।

2. हरिवंशः – विष्णुपर्वणि एकपञ्चाशत्तमाध्यायः ।
3. हरिवंशः – विष्णुपर्वणि पञ्चदशाधिकशततमाध्यायः ।
4. हरिवंशः – विष्णुपर्वणि एकपञ्चाशत्तमाध्यायः ।
5. हरिवंशः – विष्णुपर्वणि पञ्चसप्ततितमाध्यायः ।
6. हरिवंशः – विष्णुपर्वणि एकपञ्चाशत्तमाध्यायः ।
7. हरिवंशः – विष्णुपर्वणि पञ्चाशीतितमाध्यायः ।
8. हरिवंशः – विष्णुपर्वणि एकपञ्चाशत्तमाध्यायः ।
9. हरिवंशः – विष्णुपर्वणि अष्टाशीतितमाध्यायः ।
10. हरिवंशः – विष्णुपर्वणि एतसप्ततितमाध्यायः।
11. हरिवंशः – विष्णुपर्वणि एकसप्ततितमाध्यायः ।
12. हरिवंशः – विष्णुपर्वणि एकसप्ततितमाध्यायः ।
13. हरिवंशः – विष्णुपर्वणि एकसप्ततितमाध्यायः ।
14. हरिवंशः – विष्णुपर्वणि द्वादशाधिकशततमाध्यायः।
15. हरिवंशः – विष्णुपर्वणि पञ्चदशाधिकशततमाध्यायः ।
16. हरिवंशः – विष्णुपर्वणि पञ्चदशाधिकशततमाध्यायः ।